# ॥ श्रीशङ्कर भगवत्पाद सेवापद्यावली ॥

कावेरीपरिपूतवारिलहरी पूरोदरोदित्वर
स्फीताम्भःकणशीतलानिलपरिस्पन्दाधिकानन्दित ।
श्रीरङ्गाख्यपुरोल्लसद्गुरुकुलागारप्रदीपाङ्कुर
श्रीमच्छङ्करदेशिकोत्तम विभो ऋग्वेदमाकर्णय ॥१ ॥

कल्यातङ्कनिरङ्कुशस्य जगतः कल्याणसन्दायक
ब्रह्मेन्द्रादि समस्तदेवनिकुरुम्बाभ्यर्थनासाधक ।
श्रीमत्कालटिपुण्यभूपरिसरप्राप्तावतारोज्ज्वल
पूर्णातीरनिवास शङ्कर यजुर्वेदं त्वमाकर्णय ॥२ ॥

आर्याम्बामुखपङ्कजार्क शिवगुर्वानन्दसन्दोहन
स्वाचार्याधिगताखिलश्रुतितते सच्छास्त्रपारङ्गत ।
ग्राहग्रासमिषात्स्वमातृकृतसन्यासाभ्यनुज्ञानुग
श्रीमच्छङ्कर सामवेदमधुना सानन्दमाकर्णय ॥३ ॥

श्रीगोविन्दमुखोद्गतशिरोवाक्योपदेशादृत
श्रीविश्वेश्वरदर्शनोत्सुक विभो काशीनिवासप्रिय ।

संसारार्तसनन्दनादिकृतिनां सन्यासदीक्षागुरो
सामोदं त्वमथर्ववेदमधुना स्वामिन् समाकर्णय ॥४ ॥

गीतावाक्यततेर्दशोपनिषदां श्रीव्याससूत्रावलेः
प्रस्थानत्रितयस्य निस्तुलमहाभाष्यप्रणेतः प्रभो ।
वाराणस्युपसन्नशिष्यजनताभाष्योपदेशोत्सुक
स्वाधीनीकृतसर्वशास्त्रवितते शास्त्रं समाकर्णय ॥५ ॥

वृद्धब्राह्मणबादरायणकृतप्रश्नोत्तरात्युसुक
सूत्रौघस्वरसार्थवर्णनसुसंतुष्यन्मुनिश्लाघित ।
व्यासाज्ञावशतः स्वभाष्यविशदीकारप्रचारोद्यत
शुद्धाद्वैतमतप्रसारणपटो प्रीत्या पुराणं शृणु ॥६ ॥

श्रीमद्भट्टकुमारिलान्तसमये सान्निद्ध्यसन्दायक
श्रीमन्मण्डनसौधलंघनपटो वादैकभिक्षापर ।
मध्यस्तोभयभारतीपरिसरे शास्त्रार्थचर्चाकर
श्रीमन्मण्डनपण्डिताग्र्यविजयिन् सङ्गीतमाकर्णय ॥७ ॥

वादोपेक्षिसरस्वतीजयसमारम्भप्रियंभावुक

भूयः कामकलानुसारिविषयप्रश्नोत्तरालोचक ।
निर्जीवामरुकीयकायकलनात् कामागमाभ्यासक
वाणीनिर्जयलब्धवैभव गुरो वीणारवं त्वं शृणु ॥८ ॥

श्रीमन्मण्डनमिश्रवन्दित महावाक्योपदेशिन् गुरो
दत्तान्वर्थसुरेश्वराभिध तदाशङ्कासमुच्छेदक ।
श्रीमत्पद्मपदाभिवन्दित सुरेशाराध्य सत्तोटक
श्रीहस्तामलकाभिपूज्य सदयं सद्वेणुनादं शृणु ॥९ ॥

शुद्धाद्वैतसमर्थक श्रुतिशिरस्तात्पर्यसन्दर्शक
श्रीमच्छिष्यचतुष्टयान्वित महादिग्जैत्रयात्रापर ।
विद्यापीठचतुष्टयेऽपि चतुराम्नायव्यवस्थापक
श्रीकैलासग सर्ववाद्यनिनदं तुष्ट्या समाकर्णय ॥१० ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]